International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 58-60
© 2025 IJMH
www.themultijournal.com
Received: 27-11-2025
Accepted: 05-12-2025
Publish : 06-12-2025

**डॉ मनीष भारद्वाज:**
सहायकाचार्य(अ.), वेद विभाग:,
श्री दीवान कृष्ण किशोर सनातन-,
धर्म आदर्श संस्कृत कालेज,
अम्बाला छावनी- 133001.

**Correspondence:**
**डॉ मनीष भारद्वाज:**
सहायकाचार्य(अ.), वेद विभाग:,
श्री दीवान कृष्ण किशोर सनातन-,
धर्म आदर्श संस्कृत कालेज,
अम्बाला छावनी- 133001.

# भारतीयज्ञानपरम्परायां विलुप्तवैदिकयागानां संक्षिप्तपरिचय:

**डॉ मनीष भारद्वाज:**

(यज्ञो वै श्रेष्ठतमं कर्म)[१] सद्गमनस्य जनिता यज्ञ एव जीवनाधायक:"यज्ञो वै आप:, यज्ञो वै अन्न:, यज्ञो वै स्वरहर्देवा: सूर्य यज्ञैव देवता सविता"[२] । गीतायामपि यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धन:। तथा च --- इष्टान्भोगान्हि यो देवा,दास्यन्ते यज्ञभाविता:"। यज्ञस्य लोकत्रयं व्याप्ति श्रीमद्भगवद्गीताऽपि समर्थयति---"तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्"

यज्ञनिमित्तेनायुर्जीवनकाल:क्लृप्तो भवत्विति यजुर्वेदस्य माध्यन्दिनीये अष्टादशाध्याये मन्त्रेषूल्लेख: कृत:-(आयुर्यज्ञेन कल्पतां,प्राणो यज्ञेन कल्पतां............अभूम वेट् स्वाहा।[३]

शतपथब्राह्मणेऽपि "सर्वेषां देवानां आत्मा वै यद्यज्ञ:" । एतावता यज्ञ कर्मसु श्रेष्ठो भवति,येन कर्मणा सम्पूर्णं विश्वं सौख्यं कल्याणं आरोग्यमाप्नोति ।एतदर्थं मुहुर्मुहु: श्रौत स्मार्त वा श्रौतस्मार्तविहितानि यज्ञकर्माणि विश्वशान्तये सदैव कर्तव्यानीति।

अस्मिन् संसारे यावन्तो जंगमात्मका: प्राणिन: सन्ति,तेषां मनुष्येषु परोपकारभावो जायते।एतदर्थं हि प्रथमतो जगत्पिता देवान् संसृज्य अंतरिक्षादिस्थानं सृष्टवान्। यज्ञेन देवा: सौख्यसाम्राज्यमनुभवन्ति, सर्वे मनुष्या: यज्ञेन महद्वैभवं प्राप्नुवन्ति।।

वैज्ञानिकदृष्ट्यामपि विज्ञानविषये पुरुषसूक्तं प्रसिद्धमस्ति।अत्र सांगवेदपुरुषयज्ञपुरुषकालपुरुषा: इव वैज्ञानिकपुरुषोऽपि वर्तते। सम्पूर्णवैदिकवांगमयेषु यत्र तत्र इमानि उदाहरणानि उपलभ्यन्ते।।

सर्वे विद्वांसो विदन्त्येव यद् वैदिकवाङ्मयेषु विज्ञानस्य मुख्यावलम्वनं यज्ञोऽस्ति। सर्वेऽपि विज्ञानालम्बिन: स्वमतं वेदप्रतिपादितै: प्रमाणै: परिपुष्टं कुर्वन्ति।न हि केवलं भारतीया एव श्रद्धालव: अपि तु पाश्चात्या: अपि वैज्ञानिका: विद्वान्सा: श्रद्धानता दृश्यन्ते,यतो हि वैदिकवाङ्मये यज्ञादिकर्ममूलकं विज्ञानमस्ति। पुरुषवृक्षनदीकूपादि प्रकृतिपरमार्थकपदार्थानां सृष्टिस्थपृथिव्यन्तरिक्षद्युस्थानामैहिक विषयाणां व्यवहाराणां प्रबोधनस्य पर्याप्तान्युदाहरणानि उपलभ्यन्ते। यथा गीतायामपि:- ---------

**सहयज्ञा प्रजा सृष्ट्वा पुरोवाच प्रजापति।**
**अनेन प्रसविष्यद्धमेव वोऽस्त्विष्टकामधुक्।।**
**देवान् भावयतानेन ते देवा भावयन्तु व:।**
**परस्परं भावयन्त: श्रेय: परमवाप्स्यथ।।**[4]

यज् धातो: निष्पन्नोऽयं यच्छब्द: इज्यन्ते देवा: अस्मिन्निति तदर्थ:। चत्वारो वेदा: साङ्गा: सरहस्या: सच्छिष्येभ्य: सम्प्रदीयन्ते सदाचार्यैर्येन स यज्ञ:। यजनं धर्मदेशजातिमर्यादारक्षायै महापुरुषाणामेकीकरणं यज्ञ:। शतपथब्राह्मणे निगदितं सर्वेषां देवानामात्मा यज्ञ: इति। वर्तमाने तु विज्ञानस्य महिमा महत्वम् अति व प्रदीयते। यतोहि विशिष्टं ज्ञानं विज्ञानं भवति।

सर्व वेदान्तवेद्य: परमात्मा स्वमायया विराट्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवनरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवदित्यर्थ:। स एव भूमेसृष्टेरन्तरं तेषां जीवानां शरीराणि उत्पादितवान्। पुरुषैव यज्ञाद् दधिमिश्रमाज्य सम्पादित्वान्। तथा च गवाश्वादीन् पशून् उत्पादितवान्। तथा चैवं ब्राह्मणादीन् मनुष्यान् चन्द्रादिदेवान् अन्तरिक्षादिलोकान् वसन्तादीन् ऋतून् इति। स च जीवनव्यापारे ज्ञानार्थं धर्माधर्मव्यापारग्राह्याग्राह्यलक्षणं कर्तव्याकर्तव्यकर्म च। कथितमपि ---- "

**"तस्माद्यज्ञात्सर्वहुत ऋच:"**[5]

यतोहि ऋग्यजु:सामभिच्छन्दोभिश्च विना यज्ञा: न सिद्ध्यन्ति। तथा ये सृष्टिसाधनयोग्यास्तान्यपि उत्पादितवान्। "यज्ञो वै कर्म: [6], "यज्ञो वै श्रेष्ठतमं कर्म:" तथा चैवं"यज्ञो वै सर्वकामधुक् " अतो भूलोके यज्ञस्य परमं महत्वं वर्तते।

अस्माकं सनातनीपरमपरायां कर्मस्वरूपं द्विधा विभक्तोऽस्ति।तत्पक्ष्यामपि यज्ञस्य स्वरूपमपि द्विधा -------तत्कर्ममपि द्विविधं श्रौतस्मार्तंच।तत्र येषा यागानां श्रुतिषु विधानं लभ्यते,ते श्रौतयज्ञा: कत्थ्यन्ते। येषां यागानां विधिविधानं गृह्यसूत्रेषु वर्तते ते स्मार्त यज्ञा: कत्थ्यन्ते।

प्रधानत्वेन परोपकारं जगत्कल्याणं चाभिलक्ष्यैव यज्ञादीनां विधानं मनीषिभि:कृतम्। सम्यगेवोक्तं----

**"यज्ञोऽपि तस्यै जनतायै कल्पते यत्रैव विद्वान होता भवति"**[7]।

पर्यावरणेऽपि यज्ञस्य महिमा विस्तृता सन्ति। यद्यपि प्रकृतिरियं स्वयमेव अग्न्यादिभि: पुष्पादिभिश्च दोषं शोधयति परं मानवनिर्मितं प्रदूषणं शोधयितुं सा नैव क्षमा।तत्राऽस्ति पुरुषप्रयत्नानिवार्यत्वम्। गोघृते गुग्गुलकेसरयुक्तकस्तूर्यादिद्रव्येषु च तादृशं सामर्थ्यं वर्तते यद्रोगान् रोगकारणानि तानि सद्यो घ्नन्ति वायोर्यो दुर्गन्धियुक्तो विकारदोष: प्राणिकृतकर्मभिर्जायते सोऽपि होमेन दूरी भवति।वेदे निगदितं यत् --------

**यस्य कूर्मो गृहेहविस्तमग्ने वर्द्धयात्वम्।**

**तस्मै देवा अधिशुवन्नयं च ब्रह्मणस्पति:।।**[8]

यज्ञैश्च पर्यावरणरक्षा विधेयास्ति,तथैव आन्तरिक पर्यावरण-रक्षणार्थमपि महान् प्रयत्नकार्य:। सामाजिकपर्यावरण कथं शुद्धं स्यादिति जिज्ञासायामनेके वेदमन्त्रा: दृष्टिपथमुपयान्ति।श्रेष्ठ: समाज: कीदृक् स्यादिति कथं वा व्यवहरेदाचरेद् वेति तल्लक्षणं तद्विधिश्चोत्तमारित्या प्रतिपाद्यते।

एवंविधा अन्येऽपि बहवो मन्त्रा: वेदेषूपलभ्यन्ते यत्र व्यक्तिमाराभ्य कुटुम्बसमाजराष्ट्र: सार्वभौमपर्यन्तं जनेभ्यो बहुमूल्या उपदेशा: उपदिष्ट: सन्ति।अतो यदि जगति वर्तमानानां पुरुषणां सूखेन जिजीविषा वर्तते तर्हि वेदे ये ये मंत्रा: परमेश्वरेण दत्तास्ते सर्वेऽपि पूरुषै: स्वीकर्तव्या: ।

विषयेस्मिन् विषयस्य श्रौतस्मार्तकर्मस्य संक्षिप्तेन प्रतिपादय-न्ति।इत्यत्र कर्मपदेन यज्ञस्य व्यवहरन्ति। श्रौतस्मार्तयज्ञकर्माणि नित्यनैमित्तिककाम्यनिषिद्धरूपं चतुर्विधं यज्ञकर्म प्रतिपादितमस्ति।

1.नित्यम् - यावज्जीवनमग्निं जुहोति तस्य नियतनिमित्तत्वात्।

2. नैमित्तिकम् -यस्य गृहान् दहत्यग्ने क्षामवते पुरोडाशमष्टकपालं निर्वपेत्,तस्य नियतनिमित्तत्वात्।

3. काम्यम्- चित्तया यजेत् पशुकाम: इत्यादिकम्।

4.निषिद्ध - तस्मान्मवद्वाससा न सम्वदेत् न सहासीत इत्यादिकम्।

तेषु नित्यनैमित्तिकानुष्ठानात्तदकरणे प्रत्यवायो भवति।यथा याज्ञवल्क्येनोक्तम् :- "विहितस्याननुष्ठानान्निमित्तस्य च सेवनात्।

**अग्निग्रहाच्चेन्द्रियाणां नर: पतनमृच्छति।।**[9]

श्रौतकर्माणि पंचधा विभक्तानि सन्ति। १.अग्निहोत्रम् २.दर्शपौर्णमास, ३.चातुर्मास्यानि, ४.पशु: , ५.सोमश्चेति।

स्मार्तकर्माणि सप्तधा विभक्तानि सन्ति। तद्यथा हि - १.औपसन होम:,२. वैश्वदेवम्, ३.पार्वणम्, ४. अष्टका, ५. मासश्राद्धम्, ६. श्रवणा, ७. शूलगव इति सप्तपाकसंस्था:।।

अपरश्च यज्ञसंस्था: सन्ति :--(क) सप्तहविर्यज्ञसंस्था:। (ख) सप्तसोमसंस्था: ।

सप्तहविर्यज्ञसंस्था: ----१. अग्निहोत्रम्, २. दर्शपूर्णमासौ, ३. आग्रायणम्, ४. चातुर्मास्यानि , ५. निरूढपशुबन्ध:,। ६. सौत्रामणी, ७. पिण्डपितृयज्ञादयो दर्विहोमेति।।

सप्तसोमसंस्था: ----१. अग्निष्टोम: , २. अत्यग्निष्टोम:, ३. उक्त्थ्य:, ४. षोडशी, ५. वाजपेय:, ६. अतिरात्र: , ७. आप्तोर्यामिति।।

तत्राग्निहोत्रम् :-- अग्निहोत्रकर्मणि अग्निग्रहणं तु आधानैव भवति।आधानं च वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यो वर्षासु वैश्य: , एतावता अग्निहोत्रकर्म त्रैवर्णिकान् प्रतिवर्णोद्देशेन विहित-मस्ति।अनेनैव अग्न्याधानेन श्रौतानामग्नीनां सिद्धि:।

**दर्शपूर्णमासौ :**---तत्रामायां पूर्णिमायां च कर्तव्यौ।अस्य च कर्मण: सम्पादने सपत्नीकेन यजमानेन सह चत्वारा:ऋत्विजा:भवन्ति।तत्र पौर्णमासमनुष्ठाय ततो दर्शोऽनुष्ठाय: । दर्शपूर्णमासयागकर्मणि षड्यागा: भवन्ति।

तत्र पौर्णमास्याग्नेयोऽष्टाकपाल: ,पुरोडाशयाग:, अग्निषोमीय:, उपांशुयाग:,आग्नेयोऽष्टकपाल:,पुरोडाशयाग:, इन्द्रदेवताको, दधि-द्रव्यको याग: , इन्द्रदेवताक: पयोद्रव्यको याग इति त्रयम् । दर्श-पूर्णमासविष्टीनां प्रकृतियाग:।यत्र समग्रांगोपदेश :सा प्रकृति: ।यत्र चान्यतोऽंगप्राप्ति: सा विकृतिरिति। यतोहि एकंविधिवा-क्यमुल्लिखिता- "प्रकृतिवद् विकृतिकार्या" [10]

**चातुर्मास्यम्** --चतुर्षु मासेषु भवाति चातुर्मास्यानि कर्माणि। चातु-र्मास्ययागकर्मणि चत्वारि पर्वाणि भवन्ति। वैश्वदेव - वरुणप्रघास - साकमेध -शुनाशीरीयसंज्ञकानि।यागस्यारम्भ: फाल्गुन्यां पौर्णमास्यां कर्तव्य:।

**निरूढपशुबन्ध:** - प्रतिवर्षं वर्षतौ अमावस्यायां पौर्णमास्यां वा पशुना याग: कर्तव्यकार्य:।

**आग्रायणेष्टि:** - अग्रेनवान्नोपत्यान्तरमयनमाचरणं यस्य तदाग्राय-णाख्यम्।सा च शरदि वसन्ते च कर्तव्या। द्रव्यमत्र पुरोडाशश्चचरुश्च हवि: ।

**सौत्रामणी** -- ऋद्धिकामस्याग्निचितो मुखेतरच्छ्रिसोमवामिनो मुखेन सोमवामिनो राजच्युतनृपस्य पशुकामस्य च सौत्रामणीयाग: ।सा च नित्या काम्या नैमित्तिकी चेति त्रिविधा।

**सोमयाग:** - द्रव्यमत्र सोमरस: भवति।सोमोनाम कर्ताविशेष:। यागेऽस्मिन् षोडश ऋत्विजा: भवन्ति। ते च गणचतुष्टयेन विभक्ता: सन्ति।यागोऽयं दिनैकसाध्य: तथापि स्वांगै: सहितै: पंचभि: दिनैरनुष्ठीयते। स च यागानां मध्ये विशिष्टोऽयं वा स्थानं विद्यते।

**वाजपेय:** -- यागेऽस्मिन् ब्राह्मणक्षत्रियमात्रस्यैवाधिकारोऽस्ति।सप्त-संस्थान्तर्गते वाजपेये तु वैश्यस्याप्याधिकारो भवति। कालश्चास्य शरदर्तु: । यागस्यारम्भेऽन्ते च बृहस्पति सवो ज्योतिष्टोमो वा । अथ-वा वाजपेयस्य द्वादशसु शुक्लपक्षेषु द्वादशानामनुष्ठानम्।

**राजसूय:**-- येन राज्ञा वाजपेययागो न सम्पादिस्तेन राजसूययाग: कर्तव्य: ।यागेऽस्मिन् क्षत्रियमात्रस्यैवाधिकारोऽस्ति।अस्मिन् यागे अनुमत्याद्या इष्टय:,महलाद्या: पशुयागा: पवित्राद्या: सोमयागश्च भवन्ति। यागस्यारम्भकाल: फाल्गुनशुक्लप्रतिपद् भवति।

**अश्वमेध:** -- यागेऽस्मिन् अभिषिक्त: सार्वभौमराजा एव अधिकारी वर्तते । अश्वस्यसवनीयपशुत्वादश्वामेधसंज्ञा यागस्यास्य। फाल्गुन-शुक्लस्याष्टम्यां नवम्यां वा ग्रीष्मे यागस्यास्य प्रारम्भ: कर्तव्य:।

**अग्निचयनम् --** चयनं नाम इष्टकाभि: सम्पादित: स्थण्डिलविशेष: । अत: अग्न्याधारत्वादस्य स्थण्डिलस्य अग्निचयनमिति।यागेऽस्मिन् वेद्या रचना 10800 इष्टकाभ्यो भवति। वेद्याऽकृति: श्येनचिति एवं सुपर्णचिति पतत्रप्रसारितपक्षिण इव भवति।अस्य च सोमयागत्वाद् वसन्त: काल:।

**स्मार्तयज्ञेषु प्रथम औपासनहोम: ---** द्रव्यैर्हस्तेन क्रियमाणो होम: औपासनहोम: इति विशेष::। कर्मण्यस्मिन् सायं प्रातः दध्ना तण्डूलैरक्षतैर्वा होम:क्रियते।होमोऽयं सपत्नीकेन पुरुषे सायं प्रातः कालद्वयं यावज्जीवनमनुष्ठेय:.।

**वैश्वदेवम् ----** पाकयज्ञेषु द्वितीयमस्ति वैश्वदेवम्। वैश्वदेवयस्यैव च नामान्तरं महआयज्ञएतइ। तथापि "देवयज्ञ:,भूतयज्ञ:,पितृयज्ञ:, मनुष्ययज्ञ:, ब्रह्मयज्ञ:, "।

**पार्वणम्----** कर्ममिदं प्रत्यमायां कर्तव्यम्।

**अष्टकाश्राद्धम् -----** कर्ममिदमत्र हेमन्त -शिशिरसम्बन्धिनीषु चतसृषु कृष्णपक्षाष्टमीषु अपूप - गोमांस - **शाकैरिन्द्रविश्वदेव** - प्रजापति - पितृनुद्दिश्य क्रियमाणं कर्म:।

**मासश्राद्धम् -----** मासि मासि क्रियमाणं कर्ममत्र । प्रत्येकं शब्दमत्र स्वयमेव भाषितं स्वस्यार्थं "मासि मासि कोऽशनम्।

**श्रवणाकर्म -----** श्रावणमासस्य शुक्लपक्षे (पौर्णमास्यां) कर्ममिदमत्र कर्तव्यम्। तथा च इदं सर्पेभ्योऽर्थे क्रियमाणं बलिकर्म।"सक्तून्सर्पेभ्यो बलिं हरेद्राहायण्या: "इदं च सकृत्कार्यं कालसंयोगाभावात्।[11]

**शूलगव: ----** शूलगवेति गोद्रव्यक: कर्मविशेष: । गो: स्थाने स्थालीपाकस्यानुष्ठानम्।"ईशानाय स्थालीपाकमं श्रपयित्वा।[12]

**एतावता इमे श्रौतस्मार्तयज्ञा:**

भूतानां विलक्षणहितार्थ सम्बलिता सन्ति। तेभ्यो देवशुद्धि:, इन्द्रियशुद्धि:, अहङ्कार शुद्धि:,चित्तशुद्धि: भवन्ति।श्रुतिश्चास्मिन्नर्थे भवति --- "अग्निर्वै धूमो जायते धूमादभ्रमभ्रादष्टि: [13]" तथा च गीतायामुप्युक्तम्-----"अन्नाद्भवन्तिभूतानि पर्जन्यादन्सम्भव:।

**यज्ञाद्भवति पर्जन्यो यज्ञ: कर्मसमुद्भव:।** [14]

यज्ञेनैव भूतले विद्यमानानां प्राणिनामुत्पत्ति: सञ्जाता तथा च तेनैव जीवनस्य विकासोऽस्ति। एवञ्च देवपितृमनुष्याणां तर्पणेन आदित्यस्तुष्यति,तुष्ट्ये चादित्ये मेघो वर्षति। अपि च हुतं द्रव्यं वाष्पीभूय गगनमण्डलं व्याप्नोति पुनातीति। हुतद्रव्यैश्च सर्वेप्राणिन: सुवासितेन वायुना शान्तिं पुष्टिमारोग्यं चानुभवन्ति। तद् हुतं द्रव्यं च वाष्पीभूय मेघरूपेण परिणमते पश्चाच्च वृष्टिरूपेण भूमौ आपतति। तदेव जलं ब्रीह्याद्यन्नेषु वनस्पत्यादिषु च शक्तिरूपेण औषधिरूपेण च जायते।सैव जलमात्मको रस: सर्वान्मनुष्यपश्वादीन् जीवयति शरीरादिकं दृढतरञ्च सम्पादयति।

एवञ्च श्रुत्यनुसारेण तपसुत्पन्नत्वात् सर्वेऽपि जीव्यत्वात् सर्वाधात् ऋतादेव समस्तब्रह्माण्डस्योत्पत्ति: ,यस्मिन् सूर्यचन्द्रनदीसमुद्रकालादीनामुत्पत्तिरभूत् ।यथा -यज्ञपुरुषनामा ईश्वरो जीवश्च। आधिदैविक: प्रजापति: ,आदिभौतिको जीवश्च।जीवोऽपि चैतन्यमेव।स अनेकेषु स्थानेषु विभिन्ननामरूपेषु च दृश्यते। प्रजापतेरुत्कृष्टरूपं जीव इत्यथा--

**ऋतञ्च सत्यञ्चाभीद्धात्तपसोध्यजायत।**
**ततो रात्र्यजायत तत: समुद्रोऽर्णव: ।।**
**समुद्रादर्णवादधि सम्वत्सरोऽजायत।**
**अहोरात्राणि विदधद्विश्वस्य मिशतो वशी।**
**सूर्याचन्द्रमसौधाता यथा पूर्वमकल्पयत्।**
**दिवञ्चपृथिवीञ्चान्तरिक्ष मथो स्व:।।**[15]

वैदिकयागकर्मसु शान्तिपुष्ट्यादिकर्मसु विनियोगा लभ्यन्ते दृश्यन्ते च। यथा ""द्यौ:शान्तिरन्तरिक्षं शान्ति: पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति: वनस्पतय: शान्ति:"" इत्यादय: ।[16]

यज्ञादुत्पन्ना एव गवादय: , पशव: ,ऋगादिवेदा:, ब्राह्मणादयो मनुष्या: , चन्द्रादयो देवा: , अन्तरिक्षादिलोका:, वसन्तादय: षड्तव:, मनुष्याणां कल्याणस्य भावना: वेदै: प्रस्फुटा भवन्ति। कामामुपादेयत्वेनायमेव यज्ञार्थयज्ञ: कल्पित: ।""यज्ञोऽयं सर्वकामधुक्"" (अंगिरा)। यज्ञेनैव कल्याणप्रदं भवति तथाहि "यज्ञा: कल्याणहेतव:" [17]

**निष्कर्ष:**

एवमुक्त्वविवेचनेनेदं स्फुटं भवति यदेनेके ग्रन्था:सन्दर्भाश्च प्राचीनैराचार्यै: यत्र तत्र संरक्षितास्तेषामन्वेषणमद्यास्माभि: कर्तव्यम्। सन्दर्भास्सन्ति येषां स्रोतांसि नोपलभ्यन्ते।परञ्च निष्कर्षतो अत्र ""यजुर्यजते:"" इति यास्कनिरुक्तात् यज्ञप्रधानो यजुर्वेद: मन्यते।""यज्ञस्यमात्रां विमिमीत उत्व:" ।[18] अत्र त्व: एक: यज्ञस्य मात्रां स्वरूपं विमिमीते निष्पादयति, सोऽध्वर्युर्यजु: प्रधान: "" यजुषाऽऽध्वर्यवम्"" ब्राह्मणमिति।अत्र यज्ञस्य मात्रां विमिमीत एकोऽऽध्वर्यु:अध्वर्यरप्वरयुरध्वरं युनक्ति अध्वरस्य नेतेति।[19] अस्तु यज्ञात्मनस्तस्य परमपुरुषस्य यज्ञेनैव यजनीयत्वात् यज्ञस्यैव प्राधान्यं सर्वेष्वपि वेदेषु क्लृप्तम्।स च यज्ञ: ज्ञानोपासनाक्रियादिरूपो वेदोपदिष्ट: समस्तोऽपि धर्म: ।यज्ञनिष्पादकत्वादध्वर्यो: यजु: प्रधान्याच्च यज्ञप्रधानो यजुर्वेद: यजुर्वेदप्रधानो यज्ञ: सम्पद्यते। एतावता सर्वेष्वपि यज्ञेषु यजुर्वेदप्रधानो यज्ञ: सम्पद्यते।

एतावता सर्वेष्वपि यज्ञेषु यजुर्मन्त्रात्मकप्रणवपूर्वकमेव सर्ववेदमन्त्रानुवचनेन तद्यज्ञकर्मानुष्ठानविधानात्यजु:

**प्रधाना: सर्वे यज्ञा: यजु: प्रधाना: सर्वे वेदा:।।**

अनन्तशास्त्रं बहुलाश्च विद्या अल्पश्च कासर्वेष्वपि यज्ञेषु यजुर्मन्त्रात्मकप्रणवपूर्वकमेव सर्ववेदमन्त्रानुवचनेन तद्यज्ञकर्मानुष्ठानविधानात्यजु: प्रधाना: सर्वे यज्ञा: यजु: प्रधाना: सर्वे वेदा:।।

**विषयस्य गाम्भीर्यं विलोक्येदमेव वक्तुमुत्सहे यत्।।**

**~अनन्तशास्त्रं बहुलाश्च विद्या अल्पश्च कालो बहुविघ्नताच।**

**~यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात्।।**

**सन्दर्भ**


1. शतपथ ब्राह्मणम् 1/1/1/1
2. गोपथ ब्राह्मणम्
3. शुक्ल यजुर्वेद 18/29
4. श्रीमद्भगवद्गीता 3/10-11
5. शुक्ल यजुर्वेद 3/7
6. शतपथ ब्राह्मणम् 1/1/1/1
7. ऐतरेयब्राह्मणम् 1/20
8. शुक्ल यजुर्वेद 17/52
9. याज्ञवल्क्य स्मृति: 3/2/9
10. कात्यायनश्रौतसूत्र:
11. शतपथ ब्राह्मणम् 1/5/5/1
12. आपस्तम्बगृह्यसूत्रम्। 9/13
13. माध्यन्दिनीये उव्वटभाष्ये
14. श्रीमद्भगवद्गीता 3/14
15. ऋग्वेद: 10/190/1-3
16. शुक्ल यजुर्वेद 36/17
17. विष्णु पुराणे
18. ऋग्वेद 10/71/11
19. निरुक्तम् 1/7